एवं द्वादशषोड़शविंशतिदोलादिकाः कार्य्याः ।
मानं सार्द्धद्विगुणं सार्द्धत्रिगुणितं युक्तमेतेषाम् ॥
विंशतिदोलात् परतो भोजमते सम्भवेद्यानम् ।
यानं बहुतयोग्यं बहुगुणमेतज्जगाद वै व्यासः ॥
भविष्योत्तरेऽपि ।
यदुक्तं दैवदं यानं तेन मानेन यो नृपः ।
स्वयानं कुरुते दिव्यं स चिरं सुखमश्नुते ॥
स्वयोगयुक्तयानस्थो भोगमाप्नोति मानवः ।
परयौगिकयानस्थः क्लेशमाप्नोति पुष्कलम् ॥
यो दम्भादथवाज्ञानाद्यानं प्रकुरुतेऽन्यथा ।
तस्यैतानि विनश्यन्ति आयुर्व्विद्या यशो धनम् ॥
प्रधानं यानमाश्रित्य नियमोऽयं समाश्रितः ।
नाप्रधाने निर्णयोऽस्ति तल्लिङ्गन्तु मनोज्ञता ॥"
इति युक्तिकल्पतरुः ॥

चतुर्धा, व्य, (चतुःप्रकारमिति । "धाच् प्रकारे ।" इति मुग्धबोधसूत्रेण धाच् ।) चतुःप्रकारम् । चारिप्रकार इति भाषा ॥ इति व्याकरणम् ॥ (यथा, भागवते । ३ । २६ । १४ ।
"मनोबुद्धिरहङ्कारश्चित्तमित्यन्तरात्मकम् ।
चतुर्धा लक्ष्यते भेदो वृत्त्या लक्षणरूपया ॥")

चतुर्ब्बीजं, क्ली, (चतुर्णां बीजानां समाहारः ।) मेथिका चन्द्रशूरं कालाजाजी यवानिका एतच्चतुष्टयं मिलितम् । तच्चूर्णनित्यभक्षणगुणः । पवनामयाजीर्णशूलाध्मानपार्श्वशूलकटिव्यथानाशित्वम् । इति भावप्रकाशः ॥

चतुर्भद्रं, क्ली, (चत्वारि भद्राणि यत्र वृन्दे । यद्वा, चतुर्णां धर्म्मार्थकाममोक्षसंज्ञकानां भद्राणां श्रेयसां समाहारः ।) सकलधर्म्मार्थकाममोक्षम् । इत्यमरः । २ । ७ । ५८ ॥ अन्यूनाधिकशक्तिधर्म्मार्थकाममोक्षम् । इति तट्टीकासारसुन्दरी ॥ (तत्तन्मङ्गलमयगुणयुक्ते त्रि । यथा, महाभारते । ७ । ६२ । १७ ।
"स चेन्ममार सृञ्जय ! चतुर्भद्रतरस्त्वया ।
पुत्त्रात् पुण्यतरस्तुभ्यं मा पुत्त्रमनुतप्यथाः ॥")

चतुर्भुजः, पुं, (चत्वारो भुजा यस्य ।) विष्णुः । इत्यमरः । १ । १ । २० ॥ (यथा, देवीभागवते । १ । ७ । ५ ।
"विष्णुं प्रबोधयाम्यद्य शेषे सुप्तं जनार्द्दनम् ।
चतुर्भुजं महावीर्य्यं दुःखहा स भविष्यति ॥"
वटिकौषधविशेषः । यथा,—
"मृतसूतस्य भागौ द्वौ भागैकं हेमभस्मकम् ।
उग्रकस्तूरिका चैव हरितालञ्च तत्समम् ॥
सर्व्वं खल्लतले पिष्ट्वा कन्यास्वरसमर्द्दितम् ।
एरण्डपत्रैरावेष्ट्य धान्यगर्भे दिनत्रयम् ॥
संस्थाप्य तत उद्धृत्य सर्व्वरोगेषु योजयेत् ।
एतद्रसायनवरं त्रिफलामधुमर्द्दितम् ॥
तद्दृयथाग्निबलं खादेद्वलीपलितनाशनम् ।
अपस्मारे ज्वरे कासे शोषे मन्दानले क्षये ॥
हस्तकम्पे शिरःकम्पे गात्रकम्पे विशेषतः ।
वातपित्तसमुत्थांश्च कफजं नाशयेद्ध्रुवम् ॥
सर्व्वौषधिप्रयोगैर्ये व्याधयो न निवर्त्तिताः ।
कर्म्मभिः पञ्चभिश्चैव योजयेद्धसराजकः ॥
चतुर्भुजो रसो नाम महेशेन प्रकाशितः ।
क्रमेण शीलितं हन्ति वृक्षमिन्द्राशनिर्यथा ॥"
इति चतुर्भुजो रसः ॥
इति वैद्यकरसेन्द्रसारसंग्रहे उन्मादाधिकारे ॥
स्त्रियां गायत्त्रीरूपा महाशक्तिः । यथा, देवीभागवते । १२ । ६ । ४७ ।
"चतुर्भुजा चारुदन्ता चातुरी चरितप्रदा ॥"
चतुर्भुजविशिष्टे, त्रि । यथा, देवीभागवते । १ । १५ । ५६ ।
"तदा शान्ता भगवती प्रादुरास चतुर्भुजा ।
शङ्खचक्रगदापद्मवरायुधधरा शिवा ॥")

चतुर्म्मुखः, पुं, (चत्वारि मुखानि अस्य । यद्वा चत्वारो वेदाश्चत्वारि मुखानीवास्य ।) ब्रह्मा । इति शब्दरत्नावली ॥ (यथा, रघुः । १० । २२ ।
"चतुर्व्वर्गफलं ज्ञानं कालावस्थाश्चतुर्युगाः ।
चतुर्व्वर्णमयो लोकस्त्वत्तः सर्व्वं चतुर्म्मुखात् ॥"
"सर्व्वं चतुर्म्मुखात् चतुर्म्मुखरूपिणस्त्वत्तः जातमिति शेषः ।" इति तट्टीकायां मल्लिनाथः ॥ शिवः । यथा, महाभारते । १३ । १७ । ७६ ।
"चतुर्म्मुखो महालिङ्गश्चारुलिङ्गस्तथैव च ॥")
औषधविशेषः । यथा,—
"रसगन्धकलौहाभ्रं समं सूताङ्घ्रि हेम च ।
सर्व्वं खल्लतले क्षिप्त्वा कन्यारसविमर्द्दितम् ॥
एरण्डपत्रैरावेष्ट्य धान्यराशौ दिनत्रयम् ।
संस्थाप्य तत उद्धृत्य सर्व्वरोगेषु योजयेत् ॥
एतद्रसायनवरं त्रिफलामधुसंयुतम् ।
तद्दृयथाग्निबलं खादेत् बलीपलितनाशनम् ॥
क्षयमेकादशविधं कासं पञ्चविधन्तथा ।
कुष्ठमष्टादशविधं पाण्डुरोगान् प्रमेहकान् ॥
शूलं श्वासञ्च हिक्काञ्च मन्दाग्निं चाम्लपित्तकम् ।
व्रणान् सर्व्वानाढ्यवातं विसर्पं विद्रधिन्तथा ॥
अपस्मारग्रहोन्मादान् सर्व्वार्शांसि त्वगामयान् ।
क्रमेण सेवितं हन्ति वृक्षमिन्द्राशनिर्यथा ॥
पौष्टिकं बल्यमायुष्यं पुत्त्रप्रसवकारणम् ।
चतुर्म्मुखेण देवेन कृष्णात्रेयेण सूचितम् ॥"
इति प्रयोगामृते चतुर्म्मुखरसः ॥
(औषधान्तरं यथा,—
"मृतं सूतं मृतं स्वर्णं द्वाभ्यां तुल्या मनःशिला ।
विमर्द्दितञ्च तैलेन चातसीसम्भवेन च ॥
तद्गोलं वस्त्रतो बद्धा स्वचयेल्लेपयेत्ततः ।
अतसीफलकल्केन दोलायन्त्रे त्र्यहं पचेत् ॥
उद्धृत्य धारयेद्वक्त्रे जिह्वास्यदन्तरोगनुत् ॥"
इति चतुर्म्मुखो रसः ॥
इति वैद्यकरसेन्द्रसारसंग्रहे मुखरोगाधिकारे ॥)

चतुर्युगं, क्ली, चतुर्णां युगानां समाहारः । इति व्याकरणममरटीका च ॥ (चत्वारि युगानि यत्र इति विग्रहे चतुर्युगविशिष्टे, त्रि । यथा, रघौ । १० । २२ ।
"चतुर्व्वर्गफलं ज्ञानं कालावस्थाश्चतुर्युगाः ॥"
"चत्वारि युगानि कृतत्रेतादीनि यासु ताः चतुर्युगाः कालावस्थाः कालपरिमाणम् ॥" इति तट्टीकायां मल्लिनाथः ॥).

चतुर्व्वक्त्रः, पुं, (चत्वारि वक्त्राणि अस्य वस्तुतस्तु चत्वारो वेदा एव वक्त्राणि मुखानीवास्य ।) ब्रह्मा । इति हलायुधः ॥

चतुर्व्वर्गः, पुं, (चतुर्णां धर्म्मार्थकाममोक्षाणां वर्गः समूहः ।) धर्म्मार्थकाममोक्षम् । इत्यमरः । २ । ७ । ५८ ॥ (यथा, रघौ । १० । २२ ।
"चतुर्वर्गफलं ज्ञानं कालावस्थाश्चतुर्युगाः ॥")

चतुर्व्विद्यः, पुं, (चतस्रो विद्या अस्मिन्निति । यद्वा । ७ । ३ । ३१ । इत्यस्य सूत्रस्य वार्त्तिकोक्तं यथा, "चतुर्वेदस्योभयपदवृद्धिश्च । चतुरो वेदानधीते चतुर्वेदः स एव चातुर्वैद्यः । चतुर्विद्यस्येति पाठान्तरम् । चतुर्विद्य एव चातुर्व्वैद्यः ।") चतुर्व्वेदवेत्ता । अस्य रूपान्तराणि । चतुर्व्वेदः । चातुर्व्वैद्यः । चातुर्व्वेदः । इति व्याकरणम् ॥

चतुलः, त्रि, (चत + उलच् ।) स्थापयिता । इति संक्षिप्तसारे उणादिवृत्तिः ॥

चतुष्कं, क्ली, (चत्वारोऽवयवा यस्य वा कन् । चतुष्कं चतुरवयवम् । यथा, मनुः । ७ । ५० ।
"पानमक्षाः स्त्रियश्चैव मृगया च यथाक्रमम् ।
एतत् कष्टतमं विद्याच्चतुष्कं कामजे गणे ॥"
गृहविशेषः । यथा, कुमारे । ५ ६८ ।
"चतुष्कपुष्पप्रकरावकीर्णयोः
परोऽपि को नाम तवानुमन्यते ॥")
यष्टिभेदः । इति शब्दरत्नावली ॥
(पुंसि तु राजविशेषः । यथा, राजतरङ्गिण्याम् । ८ । २८४६ ।
"अथ पांशौहरिर्य्योऽभूच्चतुष्कः कोष्ठकानुजः ॥")

चतुष्की, स्त्री, (चतुष्क + स्त्रियां ङीप् ।) मशहरी । मशारि इति भाषा ॥ पुष्करिणीभेदः । इति मेदिनी । के । ८७ ॥

चतुष्टयं, क्ली, केन्द्रम् । इति नीलकण्ठीयजातकम् ॥ (चतुःसंख्या । यथा, कुमारे । ७ । १३ ।
"तस्मात् प्रदेशाच्च वितानवन्तं
युक्तं मणिस्तम्भचतुष्टयेन ॥"
चत्वारोऽवयवा यस्य । "संख्याया अवयवे तयप् ।" ५ । २ । ४२ । इति तयप् । ततो रेफस्य विसर्गे सत्वे च कृते "ह्रस्वात्तादौ तद्धिते ।" ८ । ३ । १०१ । इति षत्वम् ।) चतुरवयवे त्रि । इति मुग्धबोधम् ॥ (यथा, मनुः । ८ । १३० ।
"वधेनापि यदा त्वेतान्निग्रहीतुं न शक्नुयात् ।
तदैषु सर्व्वमप्येतत् प्रयुञ्जीत चतुष्टयम् ॥"
यथा च, कुमारे । २ । १७ ।
"प्रवृत्तिरासीच्छब्दानां चरितार्था चतुष्टयी ॥")

चतुष्पथं, क्ली, (चतुर्णां पथां समाहारः । "तद्धितार्थेति ।" २ । १ । ५१ । इति समासः । "ऋक्पूरब्धूःपथामानक्षे ।" ५ । ४ । ७४ । इति अः । "इदुदुपधस्येति ।" ८ । ३ । ४१ । इति षत्वम् । यद्वा, चत्वारः पन्थानो यत्र इति ।) एकत्र मिलितपथचतुष्टयम् । चौमाता पथ इति भाषा ॥ तत्पर्य्यायः । शृङ्गाटकम् २ । इत्य-